०२०
५६४

दुर्जन मुख चपेटिका 36

श्रीराम

पृ. सं. ३ 5735

दुर्जन मुख -चपेटिका

पृ.सं.--३ श्री राम

ON INDIA GOVERNMENT SERVICE
URGENT
PRESS MATTER
INDIA POSTAGE
RUPEES
00.24
NEW DELHI P.O.
20 IV 59
5735
The Editor,
"Gurukul Patrika", (Monthly),
Gurukul Vishwa Vidyalaya,
36

ॐ श्रीगणेशाय नमः वल्लवीवल्लभं नत्वा ब्रुवे विदुहितिनिश्चयम् भागवताभिधे ग्रंथे ह्यार्षानर्षत्वसंशये १ भागवतमनार्
षत्वमिति निवदंतः प्रष्टव्याः कथमनार्षत्वमिति ग्रंथे व्यासनामादर्शनात् यो हि ग्रंथं कृत्वा अन्यस्य नाम लिखति सोऽ
हिशीन्यायया विद्यारण्यैः वेदभाष्ये माधवनाम धनादिलोभाद्वा यथा वोपदेवेन हेमाद्रेर्नाम अत्र च व्यासनाम
लिखने ग्रंथकर्तुः किं कारणं नापि धनादिलोभः नापि प्रीत्यतिशये किंच यस्य यत्र शक्तिर्नास्ति स धनाऽ
दि दत्वाऽन्येन ग्रंथं कारयति नैतद्व्यासस्य युज्यते किंच ग्रंथकारयशोर्थलाभार्थं वा पंडितस्य व्यासनाम
लिखनेऽनुभयं न संभवति यदि ग्रंथकर्त्रा नाम्नि सत्यपि संदेहः स्यात् तर्हि महाभाष्ये पतंजलिकृतत्वे तर्का
दौ गौतमकृतत्वे शारीरकादौ शंकराचार्यकृतत्वे संदेहाद्वीरः किंच चिरकालिकैः वोपदेवादिभ्यः प्राक्तनैः
विष्णुकाचार्यैः टीकाप्रणयनं न संभवति किंच माध्वेन विजयध्वजेन भागवते टीकां वोत्पायुक्तं तत्कथं
संगच्छते वोपदेवस्य पंचसप्ततिसंवत्सराणामतीता शंकराचार्यो गोशप्तदशशतिव्यतिक्रांता आचा
र्यादिटीका कृतो न प्रवर्तते इति चेत् कठिनत्वात् आधिकार्याभावाच्च विष्णुकीवत् किंच आचार्यैर्गोविं
दाष्टः मत्त्वामत्सीहेतियशोदेत्याद्युक्तं मृङ्गत्वाणस्य भागवदन्यत्रादर्शनात् किंच अष्टादशपुराणा
नां कर्त्ता सत्यवतीसुत इति वचनादपि व्यासकर्तृत्वं निश्चये ब्रह्मवैवर्त्ते अष्टादशपुराणगणनायां भा

पञ्चाख्याने विद्यमानैः पूर्णप्रज्ञेन ब्राह्मिसरस्वतीभिः भागवतं सम्प्रापते महोजीदीक्षितैर्भागवतं स्वीकृतं तत्त + ५

दु॰ च

१

स्य

गवतं गणितत्वात् नच भगवत्या इदं भागवतमिति व्युत्पत्त्या देवीपुराणमेव गणितमिति वाच्यम् तत्रोपपुराण
नामध्ये देवीपुराणस्य पृथग्गणितत्वात् किंच मत्स्यपुराणे पुराणनामप्रस्तावे भागवतस्य लक्षणमुक्तं
ग्रंथोष्टादशसहस्र इत्यादिना अंबरीषशुकप्रोक्तमिति पद्मपुराणे नचैतद्देवीपुराणे संभवति अप्पयदी
क्षितैः शिवतत्त्वविवेकादौ संमतत्वेन तैरपि भागवतं स्वीकृतं मधुसूदनसरस्वतीभिः भक्तिरसायने भाग
^ तदपेक्षा लोकोपमधिकः पंडित योनिर्भागवतं वाममार्गगा भागवतं द्विषंति विष्णुं तु शिवद्रोहाद्यत्र देवं
सुरासवमित्यादिना वाममार्गस्य निंदितत्वात् किंच वाममार्गगा वेदमपि निंदंति तिस्रो नाम नगरी
यात् न स्पृशेत्तु लेशतो दलमित्यादिना वेदमपि निंदंति त्रयो वेदस्य कर्तारो मुनिभंडधूर्तनिशाचरा इति वदंतः मा
शाखिनो भागवतं निंदंति न च स्यात्तामिषश्राद्धं न चाद्याद्धर्मतत्त्ववित् इत्यादिना मांसभक्षणनिषेधि भागवते ×
दुत्वात् द्वैतवादिनो भागवतं द्विषंति भयं द्वितीयाभिनिवेशतः स्यादित्यादिना द्वैतदर्शनस्य भागव
तेनिंदितत्वात् किंच ते वेदमपि द्विषंति वेदे ईश्वरो निर्गुण उक्तः ते तु सगुणं वदंति वेदे जीवेश्वरयोरैक्य
मुक्तं ते तु पारमार्थिकं भेदं वदंति वेदे तु आकाशो मनश्च जायते इत्युक्तं ते तु अनाद्यनंतं वदंति वेदे तु मा
यया जगदुत्पन्नमित्युक्तं ते तु परमाणुभ्यो वदंति इत्यादिवेदविरुद्धार्थप्रतिपादकत्वात् पाखंडविशेषा
एते पालनात्त्रयीधर्मः पाशब्देन कथ्यते तं खंडयंतीति यस्मात्पाखंडास्तेन ते स्मृता इति पाखंडलक्षणस्य

२

३

पु॰ च

२

स्थितेति समः समाधिः यथा च मन्वादि धर्मशास्त्रेपि चौर्यहिंसादि निषेधात् प्राक् तदनुष्ठानं स्थितमि
ति न स्वीक्रियते तथा च प्रकृतेपि अथ विधिना चौर्याद्यनुष्ठानाभावेपि रागप्राप्तं तदासीदिति त
स्येत्रापि द्वेषतः तदाशंका स्थितमिति समं समाधानं वस्तुतस्तु श्रीधरस्वामिनां नायमाशयः
प्राक् शंका स्थितेति किंत्वन्य एव तथाहि सर्गादीनि दशलक्षणान्युक्तानि तद्भागवतमिति
स्थिते द्वितीयस्कंधस्य भागवतत्वमस्तु दशानामपि लक्षणानां संक्षेपेणोक्तत्वात् तृतीयादीना
मपि तदस्तु सर्गादेकैकस्योक्तत्वात् प्रथमस्कंधस्य तु न कथमपि भागवतत्वं एकस्यापि ल
क्षणस्यानुक्तत्वात् प्रथमस्कंधो न भागवतमिति प्राक्तनं स्थितं तत्स्वामिभिर्निराक्रियते अन्य
स्यथमातिरिक्तं भागवतमिति कुत इत्याकांक्षायामत एवोक्तलक्षणवत्सादेव अष्टादशसह
स्रत्व द्वादशस्कंधसंमितत्व गायत्रीसमारंभत्वादीनां प्रथमेन विना संभवात् उपोद्घातत्वेनाधि
कारित्वरूपेण प्रथमस्यापि भागवतत्वमस्ती यथाऽसौ च्यानवशोच्य स्वामिस्यारभ्य भागवती
नास्त्येपितत्र प्राक्तनस्य ग्रंथस्योपोद्घातत्वेन गीतात्वं तथा प्रथमस्यापि अव्यक्तव्यक्तमापन्न
मितिमहत्त्वशान् सतावमन्यते इति हरिप्रियात्र वल्लाइति वचनात् भगवतोपि निंदंतां भागवतनिं
दकोऽतिभरः यो यस्य न जानाति गुणप्रकर्षं स तं सदा निंदति नात्र चित्रं यतः किराती करिकुं

२

ति०

नेषुसत्वात् किंच माधवसरस्वतीसमयेकेनचित्पंडितेन भागवतमप्रमाणमित्युक्तं तदा स्वामिनिरु
क्तं मयंजाररोभविष्यतीविचारणीयं तदापंडितैर्विचारितेगोलकइतिनिश्चितं किंच बोपदेवकृतग्रंथ
गसानायांभागवतेत्रयग्रंथाउक्ताः परमप्रियाख्यटीकामुक्ताःफलाख्योग्रंथः हरिलीलाख्यश्चयदिभाग
वतमपितत्कृतंभवेत् तर्हि चत्वारइतिवक्तव्यं त्रयइतिकथमुक्तं वैषम्यंच वीजंनपश्यामः भागवतेव्यास
नामलिखितं त्रिषुस्थानामिति यत्तुनिबंधेषुभागवतसंमतिर्नोक्ता अत्रोच्यते निबंधेषुश्राद्धोपवासा
दिसकामधर्मनिरूपणंक्रियते भागवतेतुश्राद्धादिनेनिरूपणंनास्ति यत्तुव्यासकृतपुराणान्तरस्यश्लो
कान्प्रवीशाद्दृश्यभागवतश्लोकेषुनदृश्यतइत्युक्तं अत्राप्युच्यते सकलधर्मशास्त्रेतिहासाद्यंतं
तरस्युत्पन्निदशायांपरमप्रेम्णाभागवतंकृतं अतस्तेषुपुराणान्तरेवलद्रूपमनुमीयते यथाशंकराचार्य लप५ क०
कृतषोडशभाष्येषुतंभाष्यशाद्दृश्यंशारीरकभाष्येनदृश्यते तत्किंशंकराचार्यकृतंतेनभेवति
तथाभागवतमपि किंच कर्मस्वनादरात्सौख्यभावात् नतत्रैतत्सौत्त्वं अयभागवतेनामान्यदि
तिनशंकनीयमितिश्रीधरस्वामि वचनात् शंकाप्राप्तौतिगम्यते अन्यथानशंकनीयमिति
किमर्थमितिचेत् उच्यते मीमांसाकवैशेषिकादिभिः वेदप्रामाण्यंसाधितमितिप्राग्वेदाप्रामाण्यशंका
स्थितासीतिस्वीनक्रियते यथासथाऽत्रांस्वीकार्यं अथास्तिकानांवेदाप्रामाण्यशंकाभावेपिना
स्तिकानांसास्थितेतियत्तूच्यते तर्हिभागवतेपिभगवद्भक्तानांशंकाभावेपिशाक्तादीनांसा

वि०

कुंभयातनां सुकृतां परित्यज्य विभक्तिं गुंजामिति न्यायेन भगवतः भागवतस्य च निंद्यस्योक्तेषु चतुर्ष्वंतर्भावो
बोध्यः इदानींतनाकवयो स्वल्पतनाविभाषाकवित्वं कृत्वा तत्र स्वनाम निक्षिपंति स्वयं तु व्यासा अष्टादशसहस्र
स्री कृत्वा लोभालोभादि विनापि व्यासस्य नामनिक्षेपात् न भ्रांतः स्यात् नहि प्रयोजनमनुद्दिश्य मंदोपि
प्रवर्त्तते इति न्यायात् किंच निबंधकारैरष्टादशपुराणानां मध्ये यस्यैव नाम न लिखितं तस्यैवाप्रामा
ण्यं स्यात् शंकराचार्यैर्देवस्य बहूनां सखानां मध्ये यस्य नाम न लिखितं तस्याप्रमाण्यं स्यात् भ
गवत्याइदं भागवतमिति व्युत्पत्तिवत्त्वेन देवीपुराणं भागवतं यदि उच्यते तर्हि गच्छतीति गौरिति व्युत्पत्तिव
त्त्वेन खरोष्ट्रादेरपि गोत्वं स्यात् मनोरपत्यं मनुष्य इति व्युत्पत्त्या स्वकरादेरपि मानुषत्वं स्यात् अ
थ तत्र सात्त्वादि मत्वा भट्टिनालक्षणेन व्यवस्था यदि न क्रियते तत्रापि अष्टादशसहस्रत्वादिलक्षणेन व्यवस्था बोध्या
ननु यावत्कीर्तिर्मनुष्यस्य पुण्यलोकेषु गीयते तावद्वर्षसहस्राणि स्वर्गलोके महीयत इति वचनात् स्व
र्गप्राप्त्यर्थं व्यासनिक्षेपेण भागवतनिर्माणे न चित्रं कृतमिति चेत् किं न स्यात् मैवम् कीर्तिप्रचारो हि
न दुष्कृश्लोकात्स्वर्गप्राप्तिहेतुत्वेनावगम्यते कीर्तिस्य व्यासनामनिक्षेपात् व्यासस्यैव न तु ग्रंथकार
स्य स्वयंग्रंथो वेदेन निरुद्धार्थस्य प्रतिपादकोऽविरुद्धार्थस्य वा आद्ये स्वनाम्नैव तन्मम विप्रत्ययः वे स्यार्थ

त्वेपि अप्रामाण्यमेव स्यात् इह स्मृतिप्रणीतृचार्वाकशास्त्रवत् अन्योन्यानार्यत्वेपि वेदमूलकत्वेन स्मृतिवदस्य
प्रामाण्यमेव स्मृतीनां प्रामाण्यं हि वेदमूलकत्वेन ननु स्मृ बौ प्रणीतत्वेन अन्यथाकरणादिकत्वेन अन्यथाकरणा
दिप्रणीतशास्त्रस्यापि प्रामाण्यं स्यात् तस्याप्रामाण्यं तु पराशराद्युपपुराणे विस्तरेण प्रपंचितं अतएव
माधवरामचंद्राचार्यप्रणीतकालनिर्णयादेः प्रामाण्यं वाग्भटसंगृहीतवैद्यकस्यापि चरकाद्यविरोधा
त् प्रामाण्यं ननु स्मृतीनां ऋषिप्रणीतत्वे सति वेदाविरुद्धार्थकत्वेन प्रामाण्यमिति चेत् न लाघवेन वे
दाविरुद्धार्थकत्वेन तत्प्रामाण्यस्योचितत्वात् इति श्रीरामाभिधपरिव्राजकृता दुर्जनमुखचपेटिका ॥ शुभम्